**कित** संशये रोगापनयने च भ्वा०पर० सक० सेट् एतदर्थे स्वार्थे सन्। चिकित्सति अचिकित्सीत् चिकित्सा चिकित्सितुम् चिकित्सितः। वासे अक० न सन् इच्छायां सक० न सन्। केतति अकेतीत्। केतनं केतुः

**कित** ज्ञाने जुहो०पर०सक० सेट् वैदिकोऽयम्। चिकित्ति अकेतीत्। "यं नोअचिकेत् चित्रभानो" ऋ०१०,५१,३,

**कित** पु० कित-क। १ ऋषिभेदे तस्य गोत्रापत्यम् अश्वादि० फञ्। कैतायन तद्गोत्रापत्ये पुं स्त्री०

**कितव** पु० कि-भावे-क्त कितेन वाति वा-क। १द्यूतकारके २धुस्तूरवृक्षे अमरः ३वञ्चके, ४खले,च त्रि० मेदि० ५चौरनामकगन्धद्रव्ये, पु० शब्दरत्ना०। "यन्मा पितेव कितवं शशास" ऋ० २,२९,५। द्यूतकारके "कितवानत्तैर्दिव्यासमप्रति" अथ० ७,५,१, "स्तेनाः साहसिकाधूर्त्ताः कितवा योधकाश्च ये। असाक्षिणश्च ते दृष्टास्तेषु सत्यं न विद्यते" नारदः। "कितवाद्यूतकराः" रघु०। द्यूते विशेषः या०मिता० दर्शितोयथा "द्रष्टारोव्यवहाराणां साक्षिणश्च त एवहि" या० "द्यूतव्यवहाराणां द्रष्टारस्त एव कितवा एव राज्ञा नियोक्तव्याः न पुनःश्रुताध्ययनसम्पन्ना इत्यादि नियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकारा एव कार्य्याः न तत्र स्त्रीबालकितवेत्यादिनिषेधोऽस्ति। क्वचित् द्यूतन्निषेद्धुन्दण्डमाह" मि० "राज्ञा सचिह्नन्निर्वास्याः कूटाक्षोपधिदेविनः" या० "कूटैरक्षादिभिरुपधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाऽङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत्। नारदेन निर्वासने विशेष उक्तः "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य सह्येषां विनयः स्मृत" इति। यानि च मनुवचनानि द्यूतनिषेधपराणि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि" मि०किञ्च "द्यूतमेकमुखं कार्य्यन्तस्करज्ञानकारणात्" या०। "यत्पूर्वोक्तं द्यूतन्तदेकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम्। राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपप्रयोजनाच्च प्रायशः चौर्य्यार्जितधना एव कितवाभवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्य्यम्" मिता०। "ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्। गृह्णीयाद्धूर्त्तकितवात् इतराद्दशकं शतम्" या०। "यदाऽश्रौषं वाससां तत्र राशिं समाक्षिपत् कितवो मन्दबुद्धिः" भा० आ०१अ०। कितवस्य गोत्रापत्यम् अश्वा०फञ्। कैतवायन तद्गोत्रापत्ये पुंस्त्री। उत्करा० चतुरर्थ्यां छ। कितवीय तन्निर्वृत्तादौ अनन्तरापत्ये तिका० फिञ्। कैतवायनि तदपत्ये पुंस्त्री० तैकायनि शब्देन द्वन्द्वे फिञो लुक्, बहुत्वे। तैकायनयश्च कैतवायनयश्च तिककितवाः,। अस्य व्याघ्रादि०उपमितसमासः। कितवधूर्त्तः। शौण्डा०७त०। अक्षकितवः। वञ्चके "तव कितव! किमाहितैर्वृथा नः" माघः ६रोचननामगन्धद्रव्ये राजनि०। [ कीटभेदे त्रिका०

**किन्तनु** पु० का कुत्सिता तनुरस्य। (माकडसा) ख्याते

**किन्तमाम्** अव्य० कुत्सितार्थे किम्+बहूनां मध्ये एकस्यातिशये तमप् आमु। बहुषु मध्ये प्रकृष्टे कुत्सिते

**किन्तराम्** अव्य० कुत्सितार्थे किम्+द्वयोर्मध्ये एकस्यातिशये तरप् आमु। द्वयोर्मध्ये प्रकृष्टे कुत्सिते।

**किन्तु** अव्य० किञ्च तु च द्व०। १पूर्ववाक्यसङ्कोचज्ञापने, २प्रागुक्तविरुद्धार्थे, ३किंपुनरित्यर्थे च मेदि०।

**किन्तुघ्न** पु० तिथ्यर्द्धरूपकरणभेदे करणशब्दे विवृतिः

**किन्दत** पु० भारतप्रसिद्धे कूपभेदरूपे तीर्थे "किन्दतं कूपमासाद्य तिलप्रस्थं प्रदाय च। गच्छेत परमां सिद्धिमृणैर्मुक्तः कुरूद्वह!" भा०व०८३०अ०।

**किन्दम** पु० ऋषिभेदे सहि मृगरूपेण मृगीरूपधारिण्या स्त्रिया सह सङ्गमकाले पाण्डुना मृगबुद्ध्या हतः। तत्कथा भा० आ० ११८अ० यथा "राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते। चरन् मैथुनधर्मस्थं ददर्श मृगयुग्मकम्। ततस्ताञ्च मृगीं तञ्च रुक्मपुङ्खैः सपत्रिभिः। निर्बिभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिराशुगैः। स च राजन्! महातेजा ऋषिपुत्रस्तपोधनः। भार्य्यया सह तेजस्वी मृगरूपेण सङ्गतः" इत्युपक्रम्य पाण्डुं प्रति तत्कृरविद्धस्य तस्य शापदानमुक्तं तत्रैव यथा "मृग उवाच। नाहं घ्नन्तं मृगान् राजन्! विगर्हे चात्मकारणात्। मैथुनन्तु प्रतीक्ष्यं मे त्वयेहाद्यानृशंस्यतः। सर्व्वभूतहिते काले सर्व्वभूतेप्सिते तथा। को हि विद्वान् मृगं हन्याच्चरन्तं मैथुनं वने। अस्यां मृग्याञ्च राजेन्द्र! हर्षान्मैथुनमाचरम्। पुरुषार्थफलं कर्त्तुं तत्त्वया विफलीकृतम्। पौरवाणां महाराज! तेषामक्लिष्टकर्म्मणाम्। वंशे जातस्य कौरव्य! नानुरूपमिदन्तव। नृशंसं कर्म्म सुमहत् सर्व्वलोकविगर्हितम्। अस्वर्ग्यमयशस्यञ्चाप्यधर्म्मिष्ठञ्च